# Padmanabhashatakam

# શ્રીપદ્મનાભશતકમ્

## Document Information

Text title : Padmanabha Shatakam

File name : padmanAbhashatakam.itx

Category : shataka, vishhnu, vishnu

Location : doc_vishhnu

Author : mahArAjA svAti tirunAL

Transliterated by : P. P. Narayanaswami swami at mun.ca

Proofread by : P. P. Narayanaswami swami at mun.ca, PSA Easwaran, , M. N. Ramanuja

Latest update : February 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2025

*sanskritdocuments.org*

# શ્રીપદ્મનાભશતકમ્

મહારાજા સ્વાતિ તિરુનાળ્ વિરચિતમ્
॥ શ્રી ગણેશાય નમઃ ॥

## ॥ પ્રથમં દશકમ્ ॥

યા તે પાદસરોજધૂલિરનિશં બ્રહ્માદિભિર્નિસ્પૃહૈઃ
ભક્ત્યા સન્નતકન્ધરૈઃ સકુતુકં સન્ધાર્યમાણા હરે ।
યા વિશ્વં પ્રપુનાતિ જાલમચિરાત્ સંશોષયત્યંહસાં
સા માં હીનગુણં પુનાતુ નિતરાં શ્રીપદ્મનાભાન્વહમ્ ॥ ૧॥
સત્ત્વૈકપ્રવણાશયા મુનિવરા વેદૈઃ સ્તુવન્તઃ પરૈઃ
ત્વન્માહાત્મ્યપયોનિધેરિહપરં નાદ્યાપિ પારઙ્ગતાઃ ।
એવં સત્યહમલ્પબુદ્ધિરવશઃ સ્તોતું કથં શક્નુયાં
ત્વત્કારુણ્યમૃતે હરે! તરતિ કઃ પોતં વિના સાગરમ્ ॥ ૨॥
તસ્માચ્છિન્ધિ મદીયમોહમખિલં સંસારબન્ધાવહં
ભક્તિં ત્વત્પદયોર્દિશ સ્થિરતરાં સર્વાપદુન્મીલિનીમ્ ।
વાણીં ત્વત્પદવર્ણને પટુતમાં વિદ્વજ્જનાહ્લાદિનીં
દેહિ ત્વત્પદસેવકાય નનુ મે કારુણ્યવારાંનિધે ॥ ૩॥
યેનેદં ભુવનં તતં સ્વબલતો યસ્યાજ્ઞયોદેત્યહર્-
નાથો વાત્યનિલો દહત્યપિ શિખી સર્વેઽપિ યન્નિર્મિતાઃ ।
યશ્ચેદં સકલં જગત્સ્વજઠરે ધત્તે ચ કલ્પાવધૌ
તત્તાદૃગ્વિભવે ત્વયિ પ્રમુદિતે કિં વા દુરાપં નૃણામ્ ॥ ૪॥
ભક્તાનામખિલેપ્સિતાર્થઘટને બદ્ધોદ્યમસ્ત્વં હરે!
નિત્યં ખલ્વિતિ બોદ્ધ્યમસ્તિ બહુશો દેવ! પ્રમાણં મમ ।
નો ચેદ્વ્યાસવચસ્તવૈવ વચનં વેદોપગીતં વચો
હા રથ્યાજનવાદવદ્બત ભવેન્મિથ્યા રમાવલ્લભ! ॥ ૫॥
ઇન્દ્રદ્યુમ્નનૃપઃ કરીન્દ્રજનનં પ્રાપ્યોઽથ શાપેન વૈ

નક્રાક્રાન્તપદો વિમોચનપટુર્નાભૂત્સહસ્રં સમાઃ ।
ભૂયસ્ત્વામયમર્ચયન્ સરસિજૈઃ શુણ્ડોદ્ધૃતૈઃ સાદરં
સારૂપ્યં સમવાપ દેવ ભવતો નક્રોઽપિ ગન્ધર્વતામ્ ॥ ૬॥
પાપઃ કશ્ચિદજામિલાખ્યધરણીદેવોઽવસત્સન્તતં
સ્વૈરિણ્યા સહ કામમોહિતમતિસ્ત્વાં વિસ્મરન્ મુક્તિદમ્ ।
અન્તે ચાહ્વયદીશ! ભીતહૃદયો નારાયણેત્યાત્મજં
નીતઃ સોઽપિ ભવદ્ભટૈસ્તવપદં સંરુધ્ય યામ્યાન્ ભટાન્ ॥ ૭॥
પાઞ્ચાલીં નૃપસન્નિધૌ ખલમતિર્દુશ્શાસનઃ પુષ્પિણીં
આકર્ષશ્ચિકુરેણ દીનવદનાં વાસઃ સમાક્ષિપ્તવાન્ ।
યાવત્સા ભુવનૈકબન્ધુમવશા સસ્માર લજ્જાકુલા
ક્રોશન્તી વ્યતનોઃ પટૌઘમમલં તસ્યાસ્ત્વનન્તં હરે ! ॥ ૮॥
યામાર્ધેન તુ પિઙ્ગલા તવ પદં પ્રાપ્તા હિ વારાઙ્ગના
બાલઃ પઞ્ચવયોયુતો ધ્રુવપદં ચૌત્તાનપાદિર્ગતઃ ।
યાતશ્ચાપિ મૃકણ્ડુમૌનિતનયઃ શૌરે! ચિરં જીવિતં
નાહં વક્તુમિહ ક્ષમસ્તવ કૃપાલભ્યં શુભં પ્રાણિનામ્ ॥ ૯॥
એવં ભક્તજનૌઘકલ્પકતરું તં ત્વાં ભજન્તઃ ક્ષણં
પાપિષ્ઠા અપિ મુક્તિમાર્ગમમલં કે કે ન યાતા વિભો! ।
સ ત્વં મામપિ તાવકીનચરણે ભક્તં વિધાયાનતં
સ્યાનન્દૂરપુરેશ! પાલય મુદા તાપાન્મમાપાકુરુ ॥ ૧૦॥

## ॥ દ્વિતીયં દશકમ્ ॥

પિબન્તિ યે ત્વચ્ચરિતામૃતૌઘં
સ્મરન્તિ રૂપં તવ વિશ્વરમ્યમ્ ।
હરન્તિ કાલં ચ સહ ત્વદીયૈઃ
મન્યેઽત્ર તાન્ માધવ ધન્યધન્યાન્ ॥ ૧॥
સદા પ્રસક્તાં વિષયેષ્વશાન્તાં
મતિં મદીયાં જગદેકબન્ધો! ।
તવૈવ કારુણ્યવશાદિદાનીં
સન્માર્ગગાં પ્રેરય વાસુદેવ! ॥ ૨॥
દૃશૌ ભવન્મૂર્તિવિલોકલોલે
શ્રુતી ચ તે ચારુકથાપ્રસક્તે ।

કરૌ ચ તે પૂજનબદ્ધતૃષ્ણૌ
વિધેહિ નિત્યં મમ પઙ્કજાક્ષ ! ॥ ૩॥
નૃણાં ભવત્પાદનિષેવણં તુ
મહૌષધં સંસૃતિરોગહારી ।
તદેવ મે પઙ્કજનાભ ભૂયાત્
ત્વન્માયયા મોહિતમાનસસ્ય ॥ ૪॥
યદીહ ભક્તિસ્તવપાદપદ્મે
સ્થિરા જનાનામખિલાર્તિહન્ત્રી ।
તદા ભવેન્મુક્તિરહો કરસ્થા
ધર્માર્થકામાઃ કિમુ વર્ણનીયાઃ ॥ ૫॥
વેદોદિતાભિર્વ્રતસત્ક્રિયાભિર્-
નશ્યત્યઘૌઘો ન હિ વાસના તુ ।
ત્વત્પાદસેવા હરતિ દ્વયં યત્
તસ્માત્સ્થિરા સૈવ મમાશુ ભૂયાત્ ॥ ૬॥
ત્વદીયનામસ્મૃતિરપ્યકસ્માદ્
ધુનોતિ પાપૌઘમસંશયં તત્ ।
યદ્વદ્વદાનૌષધમાશુ હન્તિ
યથા કૃશાનુર્ભુવિ દારુકૂટમ્ ॥ ૭॥
યદ્યત્સ્મરન્ પ્રોજ્ઝતિ દેહમેતત્
પ્રયાણકાલે વિવશોઽત્ર દેહી ।
તત્તત્કિલાપ્નોતિ યદન્યભાવે
તસ્માત્તવૈવ સ્મૃતિરસ્તુ નિત્યમ્ ॥ ૮॥
અનેકધર્માન્ પ્રચરન્મનુષ્યઃ
નાકે નુ ભુઙ્ક્તે સુખમવ્યલીકમ્ ।
તસ્યાવધૌ સમ્પતતીહભૂમૌ
ત્વત્સેવકો જાતુ ન વિચ્યુતઃ સ્યાત્ ॥ ૯॥
તસ્માત્સમસ્તાર્તિહરં જનાનાં
સ્વપાદભાજાં શ્રુતિસારમૃગ્યમ્ ।
તવાદ્ય રૂપં પરિપૂર્ણસત્વં
રમામનોહારિ વિભાતુ ચિત્તે ॥ ૧૦॥

## ॥ તૃતીયં દશકમ્ ॥

દિનમનુપદયુગ્મં ભાવયેયં મુરારે
કુલિશશફરમુખ્યૈશ્ચિહ્નિતે ચારુ ચિહ્નૈઃ ।
નખમણિવિધુદીપ્ત્યા ધ્વસ્તયોગીન્દ્રચેતો -
ગતતિમિરસમૂહં પાટલામ્ભોજશોભમ્ ॥ ૧॥
યદુદિતજલધારા પાવની જહ્નુકન્યા
પુરભિદપિ મહાત્મા યાં બિભર્તિ સ્વમૂર્ધ્ના ।
ભુજગશયન! તત્તે મઞ્જુમઞ્જીરયુક્તં
મુહુરપિ હૃદિ સેવે પાદપદ્મં મનોજ્ઞમ્ ॥ ૨॥
મુરહર! તવ જઙ્ઘે જાનુયુગ્મં ચ સેવે
દુરિતહર તથોરૂ માંસળૌ ચારુશોભૌ ।
કનકરુચિરચેલેનાવૃતૌ દેવ! નિત્યં
ભુવનહૃદયમોહં સમ્યગાશઙ્ક્ય નૂનમ્ ॥ ૩॥
મણિગણયુતકાઞ્ચીદામ સત્કિઙ્કિણીભિઃ
મુખરતમમમેયં ભાવયે મધ્યદેશમ્ ।
નિખિલભુવનવાસસ્થાનમપ્યદ્ય કુક્ષિં
મુહુરજિત! નિષેવે સાદરં પદ્મનાભ! ॥ ૪॥
ભવહરણ! તથા શ્રીવત્સયુક્તં ચ વક્ષો-
વિલસદરુણભાસં કૌસ્તુભેનાઙ્ગ કણ્ઠમ્ ।
મણિવલયયુતં તે બાહુયુગ્મં ચ સેવે
દનુજકુલવિનાશાયોદ્યતં સન્તતં યત્ ॥ ૫॥
વરદ જલધિપુત્ર્યા સાધુ પીતામૃતં તે
ત્વધરમિહ ભજેઽહં ચારુબિમ્બારુણાભમ્ ।
વિમલદશનપઙ્ક્તિં કુન્દસદ્કુટ્મલાભાં
મકરનિભવિરાજત્કુણ્ડલોલ્લાસિ ગણ્ડમ્ ॥ ૬॥
તિલકુસુમસમાનાં નાસિકાં ચાદ્ય સેવે
ગરુડગમન! ચિલ્યૌ દર્પકેષ્વાસતુલ્યૌ ।
મૃગમદકૃતપુણ્ડ્રં તાવકં ભાલદેશં
કુટિલમળકજાલં નાથ નિત્યં નિષેવે ॥ ૭॥
સજલજલદનીલં ભાવયે કેશજાલં
મણિમકુટમુદઞ્ચત્કોટિસૂર્યપ્રકાશમ્ ।

પુનરનઘ! મતિં મે દેવ! સઙ્કોચ્ય યુઞ્જે
તવ વદનસરોજે મન્દહાસે મનોજ્ઞે ॥ ૮॥
ગિરિધર તવ રૂપં ત્વીદૃશં વિશ્વરમ્યં
મમ વિહરતુ નિત્યં માનસામ્ભોજમધ્યે ।
મનસિજશતકાન્તં મઞ્જુમાધુર્યસારં
સતતમપિ વિચિન્ત્યં યોગિભિઃ ત્યક્તમોહૈઃ ॥ ૯॥
અથ ભુવનપતેઽહં સર્ગવૃદ્ધિક્રમં વૈ
કિમપિ કિમપિ વક્તું પ્રારભે દીનબન્ધો ।
પરપુરુષ! તદર્થં ત્વત્કૃપા સમ્પતેન્મ-
ય્યકૃતસુકૃતજાલૈર્દુર્લભા પઙ્કજાક્ષ ! ॥ ૧૦॥

## ॥ ચતુર્થં દશકમ્ ॥

તાવકનાભિસરોજાત્
જાતો ધાતા સમસ્તવેદમયઃ ।
શંસતિ સકલો લોકો
યં કિલ હિરણ્યગર્ભ ઇતિ ॥ ૧॥
તદનુ સ વિસ્મિતચેતાઃ
ચતસૃષુ દિક્ષુ સાધુ સમ્પશ્યન્ ।
સમગાદચ્યુત તૂર્ણં
ચતુરાનનતામિહાષ્ટનયનયુતામ્ ॥ ૨॥
દૃષ્ટ્વા કમલં સોઽયં
તન્મૂલાં તવ તનું ત્વસમ્પશ્યન્ ।
કોઽહં નિશ્શરણોઽજં
કસ્માદજનીતિ દેવ! ચિન્તિતવાન્ ॥ ૩॥
જ્ઞાતું તત્ત્વં સોઽયં
સરસિજનાળાધ્વના ત્વધો ગત્વા ।
યોગબલેન મનોજ્ઞાં
તવ તનુમખિલેશ! નાપ્યપશ્યદહો ॥ ૪॥
તાવદ્દુઃખિતહૃદયઃ
પુનરપિ ચ નિવૃત્ય પૂર્વવજ્જલજે ।
તાવક કરુણામિચ્છન્

ચક્રે સમાધિમયિ! ભગવન્ ॥ ૫॥
વત્સરશતકસ્યાન્તે
દૃઢતરતપસા પરિવિધૂતહૃદયમલઃ ।
સ વિધિરપશ્યત્સ્વાન્તે
સૂક્ષ્મતયા તવ તનું તુ સુભગતમામ્ ॥ ૬॥
પુનરિહ તેન નુતસ્ત્વં
શક્તિમદાસ્તસ્ય ભુવનનિર્માણે ।
પૂર્વં ત્વસૃજત્સોઽયં
સ્થાવરજઙ્ગમમયં તુ સકલજગત્ ॥ ૭॥
સનકમુખાન્ મુનિવર્યાન્
મનસાહ્યસૃજત્તવાઙ્ઘ્રિરતહૃદયાન્ ।
સૃષ્ટૌ તુ તે નિયુક્તાઃ
જગૃહુર્વાણીં ન વૈધસીં ભૂમન્! ॥ ૮॥
અઙ્ગાદભવંસ્તૂર્ણં
નારદમુખ્યા મુનીશ્વરાસ્તસ્ય ।
મનુશતરૂપાત્માસૌ
માનુષસૃષ્ટિં ચકાર કમલભવઃ ॥ ૯॥
સર્ગસ્થિતિલયમૂલં
સુરમુનિજાલૈરમેયમહિમાનમ્ ।
તં ત્વામેવ પ્રણમન્
મુદમતુલાં પદ્મનાભ! કલયામિ ॥ ૧૦॥

## ॥ પઞ્ચમં દશકમ્ ॥

ભુવો ભારં હર્તું નિયતમવતારાંસ્તુ ભવતો
નિયુઙ્ક્તે વક્તું મામપિ જડધિયં ભક્તિરધુના ।
તદર્થં કૃત્વા મામનુપમપટું પાલય હરે
ભવત્પાદામ્ભોજપ્રવણહૃદયં દેવ સદયમ્ ॥ ૧॥
હયગ્રીવાખ્યેન ત્રિદશરિપુણા વેદનિવહે
હૃતે નિદ્રાણસ્યામ્બુરુહજનુષો હન્ત વદનાત્ ।
નિહન્તું દુષ્ટં તં વિનિહિતમતિસ્ત્વં પુરુદયા-
પયોધિસ્તૂર્ણં વૈ દધિત બત માત્સ્યં કિલ વપુઃ ॥ ૨॥

નદીતોયે સન્તર્પયતિ કિલ સત્યવ્રતનૃપે
ભવાન્ દૃષ્ટો હસ્તે પરમતનુવૈસારિણવપુઃ ।
તતો નિન્યે કૂપં પુનરપિ તટાકં ચ તટિનીં
મહાબ્ધિં તેનાહો સપદિ વવૃધે તાવક વપુઃ ॥ ૩॥
તતસ્તં ભૂપાલં પ્રલયસમયાલોકનપરં
મુનીન્દ્રાન્ સપ્તાપિ ક્ષિતિતરણિમારોપ્ય ચ ભવાન્ ।
સમાકર્ષન્ બદ્ધાં નિજ વિપુલશૃઙ્ગે પુનરિમાં
મુદા તેભ્યઃ સન્દર્શિતભુવનભાગઃ સમચરત્ ॥ ૪॥
પુનસ્સંહૃત્ય ત્વં નિજપરુષશૃઙ્ગેણ દિતિજં
ક્ષણાદ્વેદાન્ પ્રાદા મુદિતમનસે દેવ વિધયે ।
તથાભૂતાઽમેયપ્રણતજનસૌભ્યાગ્યદ! હરે!
મુદા પાહિ ત્વં માં સરસિરુહનાભાઽખિલગુરો! ॥ ૫॥
વહંસ્ત્વં મન્થાનં કમઠવપુષા મન્દરગિરિં
દધાનઃ પાણિભ્યાં સ્વયમપિ વરત્રાં ફણિપતિમ્ ।
સુરેભ્યઃ સમ્પ્રાદાસ્ત્વમૃતમિહ મથ્નન્ કિલ જવાત્
હરે દુગ્ધામ્ભોધેઃ સપદિ કમલાઽજાયત તતઃ ॥ ૬॥
તતો નિક્ષિપ્તા વૈ સપદિ વરણસ્રક્ ખલુ તયા
ભવત્કણ્ઠે માત્રા નિખિલભુવનાનાં સકુતુકમ્ ।
પપૌ ત્વત્પ્રીત્યર્થં સપદિ બત હાલાહલવિષં
ગિરીશઃ પ્રાદાસ્ત્વં સુરતરુગજાદીનિ હરયે ॥ ૭॥
પુરા તે દ્વાસ્સ્થૌ દ્વૌ સનકમુખશાપેન તુ ગતૌ
હરે! સર્વૈર્નિન્દ્યં ખલુ દનુજજન્માતિકઠિનમ્ ।
તયોર્ભ્રાતા દુષ્ટો મુરહર કનીયાન્ વરબલાત્
હિરણ્યાક્ષો નામ ક્ષિતિમિહ જલે મજ્જયદસૌ ॥ ૮॥
મહીં મગ્નાં દૃષ્ટ્વા તદનુ મનુના સેવિતપદાત્
વિધેર્નાસારન્ધ્રાત્સમભવદહો સૂકરશિશુઃ ।
તતો દૈત્યં હત્વા પરમમહિતઃ પીવરતનુઃ
ભવાન્ નિન્યે ભૂમિં સકલવિનુત પ્રાક્તનદશામ્ ॥ ૯॥
વધેન સ્વભ્રાતુઃ પરમકુપિતો દાનવવરો
હિરણ્યપ્રારમ્ભઃ કશિપુરિહ મોહાકુલમતિઃ ।
વિજેતું ત્વાં સોઽયં નિખિલજગદાધારવપુષં
પ્રતિજ્ઞાં ચાકાર્ષીદ્દનુસુતસભામધ્યનિલયઃ ॥ ૧૦॥

## ॥ ષષ્ઠં દશકમ્ ॥

પુત્રોઽસ્ય વૈ સમજનીહ તવાઙ્ઘ્રિભક્તઃ
પ્રહ્લાદ ઇત્યભિમતઃ ખલુ સજ્જનાનામ્ ।
તં તત્પિતા પરમદુષ્ટમતિર્ન્યરૌત્સીત્
ત્વત્સેવિનં કિમિહ દુષ્કરમીશ પાપૈઃ ॥ ૧॥
ભૂયોઽપિ સોઽથ જગદીશ્વર! ગર્ભવાસે
શ્રીનારદેન મુનિનોક્તભવત્પ્રભાવઃ ।
શુશ્રાવ નો જનકવાક્યમસૌ તદાનીં
તત્પ્રેરિતૈર્ગુરુજનૈરપિ શિક્ષિતશ્ચ ॥ ૨॥
દૃષ્ટ્વા પિતાઽસ્ય નિજપુત્રમતિં ત્વકમ્પ્યાં
ત્વત્પાદપદ્મયુગળાદતિરુષ્ટચેતાઃ ।
શૂલૈશ્ચ દિગ્ગજગણૈરપિ દન્દશૂકૈઃ
એનં નિહન્તુમિહ યત્નશતં ચકાર ॥ ૩॥
સોઽયં દૃઢં તવ કૃપાકવચાવૃતાઙ્ગઃ
નો કિઞ્ચિદાપ કિલ દેહરુજામનન્ત ! ।
“કસ્તે બલં ખલ! વદે”ત્યથ દેવ ! પૃષ્ટો
“લોકત્રયસ્ય તુ બલં હરિ”રિત્યવાદીત્ ॥ ૪॥
સ્તમ્ભે વિઘટ્ટયતિ કુત્ર હરિસ્તવેતિ
રૂપં તતઃ સમભવત્તવ ઘોરઘોરમ્ ।
નો વા મૃગાત્મ ન નરાત્મ ચ સિંહનાદ-
સન્ત્રાસિતાખિલજગન્નિકરાન્તરાળમ્ ॥ ૫॥
તૂર્ણં પ્રગૃહ્ય દનુજં પ્રણિપાત્ય ચોરૌ
વક્ષો વિદાર્ય નખરૈ રુધિરં નિપીય ।
પાદામ્બુજૈકનિરતસ્ય તુ બાલકસ્ય
કાયાધવસ્ય શિરસિ સ્વકરં ન્યધાસ્ત્વમ્ ॥ ૬॥
એવં સ્વભક્તજનકામિતદાનલોલ !
નિર્લેપ! નિર્ગુણ! નિરીહ! સમસ્તમૂલ ! ।
માં પાહિ તાવક પદાબ્જનિવિષ્ટચિત્તં
શ્રીપદ્મનાભ! પરપૂરુષ! તે નમસ્તે ॥ ૭॥
દૃષ્ટો ભવાનદિતિજો વટુરૂપધારી

દૈત્યાધિપેન બલિના નિજ યજ્ઞગેહે ।
પૃષ્ટશ્ચ તેન “કિમુ વાઞ્છસિ બાલકે”તિ
પાદત્રયી પ્રમિતભૂમિતલં યયાચે ॥ ૮॥
યુગ્મેન દેવ! ચરણસ્ય તુ સર્વલોકે
પૂર્ણે તૃતીયચરણં ત્વવશઃ પ્રદાતુમ્ ।
બદ્ધશ્ચ દેહિ મમ મૂર્ધ્નિ તૃતીયપાદં
ઇત્યબ્રવીદ્ગતમદોઽનુગૃહીત એષઃ ॥ ૯॥
જાતોઽસિ દેવ! જમદગ્નિસુતો મહાત્મા
ત્વં રેણુકાજઠર ઈશ્વર! ભાર્ગવાખ્યઃ ।
શમ્ભુપ્રસાદ! સુગૃહીતવરાસ્ત્રજાલઃ
કૃત્તાખિલારિનિકરોરુકુઠારપાણિઃ ॥ ૧૦॥

## ॥ સપ્તમં દશકમ્ ॥

યાઞ્ચાભિસ્ત્વં ખલુ દિવિષદાં રાવણોપદ્રુતાનાં
પુત્રીયેષ્ટ્યા ફલવિલસિતં માનવે દેવ! વંશે ।
જાતો રામો દશરથનૃપાલ્લક્ષ્મણેનાનુજેન
ભ્રાત્રા યુક્તો વરદ! ભરતેનાથ શત્રુઘ્નનામ્ના ॥ ૧॥
ધૃત્વા ચાપં સહજસહિતઃ પાલયન્ કૌશિકીયં
યજ્ઞં મારીચમુખસુમહારાક્ષસેભ્યઃ પરં ત્વમ્ ।
કૃત્વાઽહલ્યાં ચરણરજસા ગૌતમસ્યેશ! પત્નીં
ભિત્વા શૈવં ધનુરથ તદા લબ્ધવાંશ્ચાપિ સીતામ્ ॥ ૨॥
મધ્યેમાર્ગાગત ભૃગુપતિં દેવ! જિત્વાઽતિરુષ્ટં
ભૂયો ગત્વા પરમ! નગરીં સ્વામયોધ્યાં વસંસ્ત્વમ્ ।
કૈકેયીવાગ્ભ્રમિતમનસો હન્ત તાતસ્ય વાચા
ત્યક્ત્વા રાજ્યં વિપિનમગમો દુઃખિતાશેષલોકઃ ॥ ૩॥
ગત્વાઽરણ્યં સહ દયિતયા ચાથ સૌમિત્રિણા ત્વં
ગઙ્ગાં તીર્ત્વા સુસુખમવસચ્ચિત્રકૂટાખ્યશૈલે ।
તત્ર શ્રુત્વા ભરતવચનાત્તાતમૃત્યું વિષણ્ણઃ
તસ્મૈ પ્રાદા વરદ! ધરણિં પાદુકાં ચાત્મનસ્ત્વમ્ ॥ ૪॥
ભૂયો હત્વા નિશિચરવરાન્ દ્રાગ્વિરાધાદિકાંસ્ત્વં
કુમ્ભોદ્ભૂતેન ખલુ મુનિના દત્તદિવ્યાસ્ત્રજાલઃ ।

ભ્રાતૃચ્છિન્નશ્રવણવિનદચ્છૂર્પણખ્યા વચોભિઃ
ત્વાયાતાંસ્તાન્ ખરમુખમહારાક્ષસાન્ પ્રાવધીશ્ચ ॥ ૫॥
મારીચં તં કનકહરિણછદ્મનાયાતમારાત્
જાયાવાક્યાદલમનુગતઃ પ્રાવધીઃ સાયકેન ।
તાવદ્ભૂમન્! કપટયતિવેષોઽથ લઙ્કાધિનાથઃ
સીતાદેવીમહરત તદા દુઃખિતાત્માઽભવસ્ત્વમ્ ॥ ૬॥
દૃષ્ટ્વા લઙ્કેશ્વરવિનિહતં તાતમિત્રં જટાયું
તસ્યાઽથ ત્વં વરદ કૃતવાન્ પ્રેતકાર્યં વિષણ્ણઃ ।
દૃષ્ટસ્તત્રાઽનુપમ! ભવતા મારુતિર્ભક્તવર્યઃ
ભૂયસ્તુષ્ટઃ સરસમકરોઃ સાધુ સુગ્રીવસખ્યમ્ ॥ ૭॥
છિત્વા સાલાન્ સરસમિષુણા સપ્તસઙ્ખ્યાન્ ક્ષણેન
વ્યાજેન ત્વં બત નિહતવાન્ વાલિનં શક્રસૂનુમ્ ।
ભૂયોઽન્વેષ્ટું જનકતનયાં દિક્ષુ સમ્પ્રેષ્ય કીશાન્
સુગ્રીવોક્તાન્ પવનજકરે દત્તવાંશ્ચાઙ્ગુલીયમ્ ॥ ૮॥
દૃષ્ટ્વા સીતાં નિશિચરગૃહે તાવકં દેવ! વૃત્તં
કૃત્સ્નં તૂક્ત્વાપ્યદિત ભવતે મારુતિર્મૌલિરત્નમ્ ।
તુષ્ટસ્તાવત્કિલ જલનિધૌ બાણવિત્રાસિતે ત્વં
સેતું બદ્ધ્વા નિશિચરપુરં યાતવાન્ પદ્મનાભ! ॥ ૯॥
હત્વા યુદ્ધે કિલ દશમુખં દેવ! સામાત્યબન્ધું
સીતાં ગૃહ્ણન્ પરિહૃતમલાં પુષ્પકે રાજમાનઃ ।
પ્રાપ્યાયોધ્યાં હરિવરનિષાદેન્દ્રયુક્તોઽભિષિક્તઃ
ત્રાતાશેષો રહિતદયિતશ્ચાગમોઽન્તે સ્વધિષ્ણ્યમ્ ॥ ૧૦॥

## ॥ અષ્ટમં દશકમ્ ॥

દેવ! દુષ્ટજનૌઘભરેણ
વ્યાકુલાઽથ વસુધામ્બુજયોનિમ્ ।
પ્રાપ્ય દેવનિકરૈઃ શ્રિતપાદં
સ્વીયતાપમિહ સમ્યગુવાચ ॥ ૧॥
પદ્મભૂરથ નિશમ્ય ચ તાપં
ચિન્તયન્ સપદિ દેવ! ભવન્તમ્ ।
યુષ્મદીય સકલાધિહરઃ શ્રી

પદ્મનાભ ઇતિ તાનવદત્સઃ ॥ ૨॥
ભૂય એત્ય તવ મન્દિરમેતે
હીનપુણ્યનિકરૈરનવાપ્યમ્ ।
તુષ્ટુવુઃ સવિબુધો દ્રુહિણસ્ત્વાં
તાપમાશ્વકથયદ્ભસુધાયાઃ ॥ ૩॥
“સમ્ભવામિ તરસા યદુવંશે
યાદવાઃ કિલ ભવન્ત્વિહ દેવાઃ” ।
એવમીશ! કથિતે તવ વાક્યે
વેધસા કિલ સુરા મુદમાપન્ ॥ ૪॥
રોહિણીજઠરતઃ કિલ જાતઃ
પ્રેરણાત્તવ પરં ત્વહિરાજઃ ।
ત્વં ચ વિશ્વગતકલ્મષહારી
દેવકીજઠરમાશુ નિવિષ્ટઃ ॥ ૫॥
અર્ધરાત્રસમયે તુ ભવન્તં
દેવકી પ્રસુષુવેઽધિકધન્યા ।
શઙ્ખચક્રકમલોરુગદાભી -
રાજિતાતિરુચિબાહુચતુષ્કમ્ ॥ ૬॥
તાવદીશ! સકલો બત લોકો
તુષ્ટિમાપ તમૃતે કિલ કંસમ્ ।
અષ્ટમઃ કિલ સુતોઽથ ભગિન્યા-
સ્તદ્વધં કલયતીતિ ચ વાક્યાત્ ॥ ૭॥
બાષ્પપૂર્ણનયનો વસુદેવો
નીતવાન્ વ્રજપદેઽથ ભવન્તમ્ ।
તત્ર નન્દસદને કિલ જાતા -
મમ્બિકામનયદાત્મનિકેતમ્ ॥ ૮॥
કંસ એત્ય કિલ સૂતિગૃહે તે
કન્યકાં તુ શયિતાં સ નિશામ્ય ।
નૂનમેવમજિતસ્ય તુ માયા
સેયમિત્યયમતુષ્ટિમયાસીત્ ॥ ૯॥
તૂર્ણમેષ નિધને નિરતાંસ્તે
પૂતનાશકટધેનુકમુખ્યાન્ ।
પ્રાહિણોદજિત! મન્દમતિસ્તાન્

દુષ્કરં કિમિહ વિસ્મૃતપાપૈઃ ॥ ૧૦॥

## ॥ નવમં દશકમ્ ॥

એવં ઘોષે વિરાજત્યયિ! ભવતિ જગન્નેત્રપીયૂષમૂર્તૌ
દૃષ્ટા કાચિન્નિશાચર્યથ સમધિગતા ચારુયોષિત્સ્વરૂપા ।
સ્તન્યં દાતું કુચાગ્રં તવમુખજલજે દેવ! ચિક્ષેપ યાવત્
તાવત્ક્ષીરં સજીવં કપટશિશુરહો પીતવાંસ્ત્વં ક્ષણેન ॥ ૧॥
ભૂયઃ શૌરે! વ્રજે વૈ શકટદનુસુતઃ પ્રાપ્તવાન્ સંહૃતોઽયં
વાતાત્મા દાનવશ્ચ પ્રવિતત ધરણીભારનાશેન કૃત્તઃ ।
દૃષ્ટ્વૈવં તે મહત્વં દનુજહૃતિચણં તાદૃશીં બાલલીલાં
ત્વન્માયામોહિતત્વાદયિ! બત! પશુપા વિસ્મયં મોદમાપન્ ॥ ૨॥
નન્દઃ પશ્યન્ કદાચિન્નિજનિલયગતં યાદવાચાર્યવર્યં
ગર્ગં તે કારયામાસ ચ વિધિવદસૌ નામ કૃષ્ણેતિ તેન ।
રામાખ્યાં સોદરે તે મુનિરથ કલયન્ વૈભવં ચ ત્વદીયં
નન્દાદિભ્યઃ પ્રશંસન્ નિજપદમિહ સમ્પ્રાપ્તવાન્ ભક્તવર્યઃ ॥ ૩॥
દૃષ્ટં માત્રા સમસ્તં જગદિહ વદને મૃત્તિકાભક્ષણં તે
વ્યાકુર્વન્ત્યા શિશૂનામથ વચનવશાત્કિં ત્વિતો હન્ત ચિત્રમ્ ।
ભૂયસ્તૂર્ણં ભવાન્ મઙ્ગળગુણ! ગતવાન્દેવ! વૃન્દાવનં તત્
યુષ્મદ્ગાત્રોરુશોભા પ્રતુલિત યમુનાતીરસંસ્થં મનોજ્ઞમ્ ॥ ૪॥
વન્યાશં ત્વય્યધીશે કલયતિ તરસા શ્રીધરાહો વિરિઞ્ચો
ગોપાન્ વત્સાન્ ત્વદીયાનહરદયિ! વિભો! તાવદેવ સ્વરૂપમ્ ।
સઙ્ખ્યાહીનં પરં ત્વામપિ કબળધરં વીક્ષ્ય સમ્ભ્રાન્તચેતાઃ
ત્વત્પાદાબ્જે પતિત્વા મુહુરપિ ભગવન્નસ્તવીદચ્યુતં ત્વામ્ ॥ ૫॥
સર્પં તોયે નિમગ્નં પરમસુકુટિલં કાળિયં વીક્ષ્ય શૌરે!
નૃત્યન્ નૃત્યન્ ફણે ત્વં તદનુ ગતમદં ચાકરોસ્તં ગતં ચ ।
ભૂયસ્ત્વદ્વેણુગાનાદજિત! જગદલં મોહિતં સર્વમાસીત્
યોષિચ્ચિત્તાપહારે નિપુણમિદમિતિ શ્રીશ! કિં વર્ણનીયમ્ ॥ ૬॥
ધૃત્વા ગોવર્ધનં ત્વં ગિરિમલમતનોર્વાસવં વીતગર્વં
યોષિદ્ભિસ્ત્વં સલીલં રજનિષુ કૃતવાન્ રાસકેળિં મનોજ્ઞામ્ ।
ભક્તાગ્ર્યં ગાન્દિનેયં તવ ખલુ નિકટે પ્રેષયામાસ કંસઃ
હત્વેભેન્દ્રં ચ મલ્લાન્ યદુવર! સબલો માતુલં ચાવધીસ્ત્વમ્ ॥ ૭॥

ગત્વા સાન્દીપનિં ત્વં કતિપયદિવસૈઃ જ્ઞાતવાન્ સર્વવિદ્યાઃ
કૃત્વા રાજ્યે નરેન્દ્રં વિમલતમગુણં ચોગ્રસેનં જવેન ।
રાજાનં ધર્મસૂનું ચરણરતમવન્ ચૈદ્યમુખ્યાદિહન્તા
રુક્મિણ્યાદ્યષ્ટયોષાયુતબહુવનિતાશ્ચારમો દ્વારકાયામ્ ॥ ૮॥
વિપ્રં નિસ્સ્વં કુચેલં સદનમુપગતં બાલ્યકાલૈકમિત્રં
પશ્યન્ કારુણ્યલોલઃ પૃથુકમિહ કરાત્તસ્ય સઙ્ગૃહ્ય તૂર્ણમ્ ।
લક્ષ્મીસંવારિતોઽપિ સ્વયમપરિમિતં વિત્તમસ્મૈ દદાનઃ
કારુણ્યામ્ભોનિધિસ્ત્વં જય જય ભગવન્! સર્વલોકાધિનાથ! ॥ ૯॥
યાવદ્વૃદ્ધિઃ કલેર્વૈ ભવતિ બત તદા કલ્કિરૂપોઽતિહીનાન્
મ્લેચ્છાન્ ધર્મૈકશત્રૂન્ ભરિતપુરુરુષા નાશયિષ્યત્યશાન્તાન્ ।
સ ત્વં સત્વૈકતાનાં મમ મતિમનિશં દેહિ શૌરે! તદર્થં
ત્વત્પાદાબ્જે પતિત્વા મુહુરહમવશઃ પ્રાર્થયે પદ્મનાભ! ॥ ૧૦॥

## ॥ દશમં દશકમ્ ॥

ભૂષણેષુ કિલ હેમવજ્જગતિ મૃત્તિકાવદથવા ઘટે
તન્તુજાલવદહો પટેષ્વપિ વિરાજિતાદ્વયરસાત્મકમ્ ।
સર્વસત્વહૃદયૈકસાક્ષિણમિહાતિમાય નિજવૈભવં
ભાવયામિ હૃદયે ભવન્તમિહ પદ્મનાભ! પરિપાહિ મામ્ ॥ ૧॥
ચિન્મયામ્બુનિધિવીચિરૂપ! સનકાદિચિન્ત્યવિમલાકૃતે !
જાતિકર્મગુણભેદહીન! સકલાદિમૂલ! જગતાં ગુરો ! ।
બ્રહ્મશઙ્કરમુખૈરમેયવિપુલાનુભાવ! કરુણાનિધે!
ભાવયામિ હૃદયે ભવન્તમિહ પદ્મનાભ! પરિપાહિ મામ્ ॥ ૨॥
માયયાવૃતતનુર્બહિઃ સૃજસિ લોકજાલમખિલં ભવાન્
સ્વપ્નસન્નિભમિદં પુનસ્સપદિ સંહરન્નિજબલાદહો! ।
હન્ત! કૂર્મ ઇવ પાદમાત્મનિ તુ ધારયત્યથ યદા તદા
દારુણે તમસિ વિસ્તૃતે વિતિમિરો લસત્યનિશમાત્મના ॥ ૩॥
દેવદેવ! તનુવાઙ્મનોભિરિહ યત્કરોમિ સતતં હરે!
ત્વય્યસાવથ સમર્પયામ્યખિલમેતદીશ! પરિતુષ્યતામ્ ।
ત્વત્પદૈકમતિરન્ત્યજોઽપિ ખલુ લોકમીશ્વર! પુનાત્યહો!
નો રમેશ! વિમુખાશયો ભવતિ વિપ્રજાતિરપિ કેવલમ્ ॥ ૪॥
પાપ એષ કિલ ગૂહિતું નિજ સુદુશ્ચરિત્રમિહ સર્વદા

કૃષ્ણ! રામ! મધુસૂદનેત્યનિશમાલપત્યહહ! નિષ્ફલમ્ ।
એવમીશ! તવ સેવકો ભવતિ નિન્દિતઃ ખલજનૈઃ કલૌ
તાદૃશં ત્વનઘ! મા કૃથા વરદ! મામસીમતમવૈભવ! ॥ ૫॥
કસ્તુ લોક ઇહ નિર્ભયો ભવતિ તાવકં કિલ વિના પદં
સત્યલોકવસતિ સ્થિતોઽપિ બત ન સ્થિરો વસતિ પદ્મભૂઃ ।
એવમીશ સતિ કા કથા પરમ! પાપિનાં તુ નિરયાત્મનાં
તન્મદીય ભવબન્ધમોહમયિ! ખણ્ડયાઽનઘ! નમોઽસ્તુ તે ॥ ૬॥
ભાવયન્તિ હિ પરે ભવન્તમયિ! ચારુ બદ્ધવિમલાસનાઃ
નાસિકાગ્ર ધૃતલોચનાઃ પરમ! પૂરકાદિજિતમારુતાઃ ।
ઉદ્ગતાગ્રમથ ચિત્તપદ્મમયિ! ભાવયન્ત ઇહ સાદરં
ભાનુસોમશિખિમણ્ડલોપરિ તુ નીલનીરદસમપ્રભમ્ ॥ ૭॥
શ્લક્ષ્ણનીલકુટિલાળકં મકરકુણ્ડલદ્યુતિવિરાજિતં
મન્દહાસહૃતસર્વલોકવિપુલાતિભારમતિમોહનમ્ ।
કૌસ્તુભેન વનમાલયાપિ ચ વિરાજિતં મદનસુન્દરં
કાઞ્ચનાભવસનં ભવન્તમયિ! ભાવયન્તિ હૃતકલ્મષાઃ ॥ ૮॥
જ્ઞાનમીશ! બત! કર્મ ભક્તિરપિ તત્ત્રયં ભવદવાપકં
જ્ઞાનયોગવિષયેઽધિકાર ઇહ વૈ વિરક્તજનતાહિતઃ ।
કર્મણીહ તુ ભવેન્નૃણામધિકસક્તમાનસજુષાં હરે!
યે તુ નાધિકવિરક્તસક્તહૃદયા હિ ભક્તિરયિ! તદ્ધિતા ॥ ૯॥
દેવ! વૈભવમજાનતાદ્ય તવ યન્મયા નિગદિતં હરે!
ક્ષમ્યતાં ખલુ સમસ્તમેતદિહ મોદમીશ! કુરુ તાવકે ।
દીર્ઘમાયુરયિ! દેહસૌખ્યમપિ વર્ધતાં ભવદનુગ્રહાત્
પઙ્કજાભનયનાપદો દલય પદ્મનાભ! વિજયી ભવ! ॥ ૧૦॥

॥ ઇતિ મહારાજા સ્વાતિ તિરુનાળ્ વિરચિતં પદ્મનાભશતકમ્ ॥

Encoded and proofread by P. P. Narayanaswami, M. N. Ramanuja
PSA Easwaran

*Padmanabhashatakam*

pdf was typeset on February 18, 2025

Please send corrections to *sanskrit@cheerful.com*